क्रम सं०

विषयः कर्मकाण्ड

प्रवेश सं० २८०२१

ग्रन्थकार

नाम संकष्टचतुर्थीपूजा

पत्र सं० १-६

अक्षर सं० (पंक्तौ) २८ पंक्ति सं० (पृष्ठे) ७

श्लोक सं०

लिपिः दे. ना.

आधार: अ.

आकार: ८.५ x ३.४

विवरणम् पू.

583587

ग. ३ ७५/५८३

पी० एस० यू० पी० --- ११ एम० सी० ई०---१९५९---५० ०००

Indira Gandhi National Centre for the Arts

श्रीगणेशायनमः ।अथसंकष्टचतुर्थीव्रतपूजनं लिख्यते।भूवोदेशोगोम
येनोपलिप्य।तस्योपरिदलंविलिख्य।तत्रकलशंस्थाप्यतस्योपरितांम्रपा
त्रंयथासंभवंनिधाय।देवंतत्रैवनिधाय।स्वमासनेउपविश्यपाचम्यप्राणा
नायम्यतिथ्यादिसंकीर्त्य।एवंगुणेतिपुण्यतिथौ।ममसमस्तपापक्षयद्वा
राश्रीगणपतिप्रीत्यर्थंचतुर्विधपुरुषार्थसिध्यर्थंसंकष्टनाशनार्थंगणे
शपूजनमहंकरिष्ये।इतिसंकल्प्य।तदंग।निराहारोघदेवेशायावच्चंद्रो
दयोभवेत्।भोक्ष्यामिपूजयित्वाहंगणेशशरणंभव।मंत्रषडंगंकुर्यात्।
अस्यश्रीहेरंबमंत्रस्यभृगुऋषिः।अनुष्टुप्छंदः।विनायकोदेवता।गंबी
जंओंशक्तिः।श्रीइष्टसिध्यर्थंविनायकप्रीत्यर्थंमंत्रजपंकरिष्ये।तत्रन्यासः।

८१

१८

ॐनमोहेरंबः ष्ठाभ्यांनमः।ॐमदमोदितर्जनीभ्यां०ॐममसंकष्टनाश
नंमध्यमाभ्यां ऽनिवारयअनामि: भ्यां०फट्कनिष्ठिकाभ्यां०स्वाहाक
रतलकरपृष्ठा भ्यांनमः।एवंहृदयादि।ॐनमोहेरंबहृदयाय०ॐमदमो
दितशिरसेस्वा हा।ॐममसंकष्टनाशनशिखायवौषट्०ॐनिवारयकवचा
यहुं०ॐफट् नेत्रायवौषट्।ॐस्वाहाअस्त्रायफट्।हेरंबप्रीत्यर्थेजं
पे।वि।नियोगः अथजपः।ॐनमोहेरंबमदमोदितममसंकष्टनिवारय
फट्स्वाहा। अथकलशप्रतिष्ठा।अथध्यानं।रक्तांगंरक्तवस्त्रंसितकु
सुमगणैःपूजितं पुष्पगंधैःक्षीराब्धौरत्नदीपेसुरतरुविमलेरत्नासिं राम
५८ हासनस्थं।दोर्भिःपाशांकुशेष्टाभययुतेसुचिरंचंद्रमौलिंत्रिनेत्रंध्या २

येच्छांत्यर्थम।शंगणपतिममलंश्रीसमेतंप्रसन्नं।१।इतिध्यानं।अना
थनाथसर्वज्ञगोकेशगणनायक।अत्रागच्छजगद्वंद्यसुरराजाधिपेश्व
र।सूर्यकोटिप्रतीकाशगजवक्त्रचतुर्भुज।आगच्छदेवदेवेशगणराजनमो
स्तुते।सहस्रशीर्षेति।गजाननायनमः।आवाहनं।अभीप्सितार्थसिध्यर्थं
पूजितोयःसुरासुरैः।सर्वविघ्नच्छिदेतस्मैगणाधिपतयेनमः।कुरुषएवंदे०
विघ्ननाशिनेनमः।आसनं।इंद्रादिवंदितोदेवःसिद्धगंधर्वसेवितः।पाद्यंगृ
हाणदेवेशविनायकनमोस्तुते।एतावानस्येति।लंबोदराय०पाद्यं।एकदं
तमहाकायनागयज्ञोपवीतक।गणाधिदेवदेवेशगृहाणार्घ्यंनमोस्तु
ते।त्रिपादूर्ध्वो०।चंद्रार्धधारिणेनमः।अर्घ्यं०।महारूपमहाकायअ

Indira Gandhi National
Centre for the Arts

सं० पू०
२

नंलवरदायक देवदेवनमस्तोस्तुते विघ्नगणनायक। तस्माद्विसाल्लिति।
विश्वप्रियाय। गावु मतं। शर्करारः सियुक्तं पयोदधिघृतं मधु पंचामृ
तं समानीतं स्नानार्थं नदिष्णु नायक। यत्पुरुषेणेति। ब्रह्मचारिणेनमः। पंचा
मृतस्नानं। शुद्धोदकस्नानं। पुरुषसूक्तेन। रक्तवस्त्रयुतं युग्मं देवानां च सु
मंगलं। गृहाणेश्वर सर्वज्ञ लंबोदर शिवात्मज। तं यज्ञमिति। सर्वप्रदाय
काय० वस्त्रं। रक्षणार्थं ब्रह्मसूत्रं कांचनस्योत्तरीयकं। वक्रतुंड गृहाणेदं
भक्तानां वरदः प्रभो। तस्माद्यज्ञादिति। वक्रतुंडायनमः यज्ञोपवीतं। सिंदू
रचर्चितं देव सिंदूरप्रियसुंदर। दास्यामि देवदेवेश सर्वसिद्धिफलं कुरु॥
गणेशायनमः। सिंदूरं। गंधं गृहाण देवेश दिव्यचंदनमुत्तमं। कर्पूरकुंकु राम
२

माम्यक्तं मुमासुत नमोस्कृते। तस्माद्यज्ञादिति। रुद्रपुत्राय० गंधं। साक्षा
क्षताः शुभाः शुभ्रा गृहाण वरदायक। सर्वदेवगणाध्यक्ष नमो रुद्रप्रिया
त्मज। गणेशाय० अक्षताः। सुगंधानि सुपुष्पाणि रक्तानि विविधानि च। वि
नायक नमस्कृ पं गृहाण सुरपूजित। तस्मादश्वा इति। गुणत्रयात्मिने नमः।
पुष्पाणि। एकदंतायनमः। परिमलद्रव्याणि। ।अथ एकविंशति पुष्पाणि।
गजाननाय १ विघ्नराजाय २ कुब्जाय नमः ३ लंबोदराय० ४ शिवाय न० ५
वक्रतुंडाय० ६ शूर्पकर्णाय ७ गणेश्वराय ८ विघ्ननाशिने० ९ विकटायनमः १०
वामनाय० ११ सर्वदेवाय १२ सर्वार्तिनाशिने० १२। विघ्नहर्त्रेनमः १४ धूम्रा
य १५ सर्वदेवाधिदेवाय० १६ एकदंताय० १७ कृष्णपिंगलाय १८ भालचं

Indira Gandhi National
Centre for the Arts

स°पू° द्राय°१९ दशी॰ मंदितायनमः२०। महागणपतयेनमः २१ दूर्वाणि समर्प
यामि। अथ २१ पत्राणि। गणाधिपायनमः भृंगराजपत्रं स
मर्पयामि १ उमापुत्राय° बिल्वपत्रं २ गजाननाय° दूर्वापत्रं ३ लंबो
दराय° बदरीपत्रं ४ हरसूनवेन° पद्मपत्रं ५ गजवक्त्राय° तुलसीपत्रं ६
गुहाग्रजाय° अपामार्गपत्रं ७ एकदंताय° बृहतीपत्रं ८ इभवक्त्राय°
शमीपत्रं ९ विकटाय° अगस्तिपत्रं १० भिन्नदंताय° करवीरपत्रं ११
विनायकाय° अश्वत्थपत्रं १२ कपिलाय° अर्कपत्रं १३ भवनंदनाय°
अर्जुनपत्रं १४ वलीहीनाय° विष्णुक्रांतिपत्रं १५ वटवेन° दाडिमीप
त्र° १६ सुराधिपाय° देवदारूपत्रं १७ भालचंद्राय° मरुगपत्रं १८ हे राम ३

रंबाय° श्वेतदूर्वापत्रं १९ शूर्पकर्णाय° जाजीपत्रं° २० एकदंताय° केत
कीपत्रं समर्पयामि २१। अथांग पूजा। गणेशाय° पादौ पूजयामि। गौ
रीपुत्रायन° गुल्फौ° विघ्नेश्वराय° जानुनी° गजाननाय° ऊरू° हेरंबाय° क
टिं° लंबोदराय° उदरं° इंद्रापुत्राय° वक्षः° गणनाथाय° स्तनौ° द्वैमातुराय°
हृदयं° स्थूलकंठाय° कंठं° स्कंदाग्रजाय° स्कंधौ° परशुहस्ताय° हस्तान्°
इभवक्त्राय° वक्त्रं° त्रिनेत्राय° नेत्राणि° शूर्पकर्णाय° कर्णौ° एकदंताय°
दंतान्° भालचंद्राय° भालं° वक्रतुंडाय° शिरः पूजयामि। अथ एतैर्नामभिः
दूर्वायुग्मानि समर्पयेत्। ।गणाधिपायनमः। दूर्वायुग्मं समर्पयामि १ उमापुत्रा
यन° दूर्वा° २ अघनाशिने° दू° ३ एकदंताय° दू° ४ इभवक्त्राय° दूर्वा° ५ मूषक

Indira Gandhi National
Centre for the Arts

सं.पू.
४

वाहनाय० दूर्वा० ६ विनायकाय० दू० ७ ईशपुत्राय० दू० ८ सर्वसिद्धिप्रदाय० ९ कु
मारगुरवे नमः दूर्वा० १० । अथ सर्वैरेकाः समर्पयेत् । गणाधिप नमस्तेस्तु
उमापुत्राघनाशन । एकदंतेभवक्त्रेति तथा मूषकवाहनो विनायके
शपुत्रेति सर्वसिद्धिप्रदायक । कुमारगुरवे तुभ्यं पूजनीयः प्रयत्नतः ।
दशांगं गुग्गुलं धूपं सुगंधं सुमनोहरं । धूपं गृहाण देवेश उमापुत्र न
मोस्तु ते । यत्पुरुषं व्यदधुः । भवानीप्रियाय० धूपं० । वं ज्योतिः सर्वदेवा
नां तेजसां तेज उत्तमं । आत्मज्योतिः परं धाम दीपोयं प्रतिगृह्यतां । ब्राह्म
णोस्य । ति० रुद्रप्रियाय० दीपं । मोदकापूपलड्डुकवटकोडुंबराणि च । स
घृतं पायसान्नं च नैवेद्यं प्रतिगृह्यतां । चंद्रमा मनसो जातः । विघ्ननाशि राम
४

नेनमः । नैवेद्यं । आचमनं । इदं फलं मया देव गृहाण गणनायक । कदली
ने नमः । नैवेद्यं । आचमनं । इदं फलं मया देव ... संकष्टनाशिने नमः । फलं । पुगीफलैः स
नारिकेलादि तं तथा नो जगत्प्रभो । संकष्टनाशिने नमः । फलं । पुगीफलैः स
कर्पूरैर्नागवल्लीदलैर्युतं । चूर्णकर्पूरसंयुक्तं तांबूलं प्रतिगृह्यतां । नाभ्या आ
सीत् । तांबूलं । सप्तास्यासीन् ति० हिरण्यगर्भमिति च । सुमुखाय नमः । दक्षि
णां । चंद्रादित्यौ च धरणी विद्युदग्निस्तथैव च । त्वमेव सर्वज्योतींषि आर्तिक्यं
प्रतिगृह्यतां । नीराजनं । मंत्रपुष्पं नमोस्तु देवदेवेश भक्तानामभयंकर ।
विघ्नानां नाशकश्चैव हेरंब ते नमोस्तु ते । यज्ञेन यज्ञ० । वक्रतुंडाय नमः । नमस्का
रं । संसारपीडाव्यथितं हि मां सदा संकष्टभूतं सुमुख प्रसीद । त्वं हि मे नाश

Indira Gandhi National
Centre for the Arts

सं॰पू॰ ५

यकष्टसंघातन्नमो नमः क्लेशविनाशनाय। यदुद्दिश्य कृतं तेद्य यथाशक्तिप्र
पूजनं। कष्टान्मे [illegible] रदेवेश शिवपुत्र नमोस्तुते। सिद्धिप्रद महाघाश्च सर्वा
न्कामान्प्रपूरय। विघ्नानां नाशकादेव विघ्नराज नमोस्तुते। त्वत्प्रसादेन
कार्याणि सर्वाणि च करोम्यहं। शत्रूणां नाशनं चैव विघ्नानां ध्वंसनं कु
रु॥ इति प्रार्थना। मंत्रहीनमिति क्षमापणं। ततो वायनदानं। आचार्यं सं
पूज्य। विप्रवर्य नमस्तुभ्यं साक्षाद्देवस्वरूपिणे। गणेशप्रीतये तुभ्यं मो
दकान्वै ददाम्यहं। मोदकान्सफलान्नैव दक्षिणा धूपसंयुतान्। अवमो
त्तारणार्थाय न्त्वहाणे मान्नमोस्तुते। अबहुमतिरिक्तं च द्रव्यहीनं मया

गप ६

कृतं। तत्सर्वं पूर्णतामेतु विप्ररूप नमोस्तुते। इति वायनदानं। ततश्चंद्र
पूजा षोडशोपचारैरभ्यर्च्य। अर्घ्यं दद्यात्। क्षीरोदार्णवसंभूत अत्रिगो
त्रसमुद्भव। गृहाणार्घ्यं मया दत्तं गणेशप्रीतिवर्धन। क्षीरसागरसंभू
त सुधारूप निशाकर। गृहाणार्घ्यं मया दत्तं रोहिण्या सहितः शशी॥ निशा
पते नमस्तुभ्यं नमस्ते ज्योतिषांपते। नमस्ते रोहिणीकांत अर्घ्यं मे प्रति
गृह्यतां॥ ।अथ गणेशार्घ्यं। गौरीसुत नमस्ते     बुद्धिप्रदायक। सर्व
संकष्टनाशाय गणेशार्घ्यं नमोस्तुते। इति ग॰     ।तिथिनामुत्तमे
देवी गणेशप्रियवल्लभे। सर्वसंकष्टनाशाय     नमोस्तुते॥ इति पू
जा समाप्ता॥ ७॥

सं॰ क॰ ६

अथ कथा। श्रीकृष्ण उवाच। अरण्ये वर्त्तमाने त ... युधिष्ठिरं। सा
बांधवं सुखासीनमागतो व्यास आद रात्त ... ष्टा मुनिराह कम
भुस्यानंददो नृपः। मधुपर्कं च सार्घ्यं च दद ... वो वद ह। २। युधि
ष्ठिर उवाच। अद्य मे सफलं जन्म जीवितं च सुजीवितं। येसं कदाहि मे जा
ता वने वननिवासिनः। ३। ते सर्वे विलयं याता भवतो दर्शने न हि। अ
मानं साधु मन्येहं राज्यतृष्णापराङ्मुखं। ४। दुःखितं मां कथं स्वा
मिनू राज्यभ्रष्टं न वेत्सि किं। इमे भीमादयः सर्वे बांधवा व्यथयंति मां।
। ५। दुराधर्षास्तु वीर्या हि महाशस्त्रा घोरनाः। इयं तु द्रौपदी साध्वी

मा २

राम ६

Indira Gandhi National
Centre for the Arts